श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमदण्णयार्यकृतिषु

# ॥ आचार्यविंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यविंशतिः ॥

सह रमया मुकुन्दमपि सूत्रवतीदयितं
शठरिपुनाथपङ्करुहलोचनदाशरथीन्।
हृदि कलयामि यामुनमुनीश्वर पूर्णयति -
प्रवरमुखान् समं मम गुरूनपि तद्गुरुभिः॥ 1 ॥

अधिगतसत्पथे महितभूम्नि गुरुप्रवरे
प्रथयति यत्र नव्यकरुणारसवर्षकताम्।
भजति सरस्वती बहुळतां निगमान्तगुरो -
स्स भवतु वादिहंसजलदो मम सत्फलदः॥ 2 ॥

अमृतरसप्रदाननिपुणो निजपादजुषां
विबुधगुणोपभोगघटनार्हकलाविभवः।
करिभयदस्थितिर्द्विजपतिर्निगमान्तगुरु -
र्नुदतु ममान्तरं सपदि सन्तमसं महसा॥ 3 ॥

निजमतिमन्धभूमिधरघातपरिक्षुभिता -
न्निगममहार्णवात् प्रपदनाभिधया सुधया।
समुदितया मुदं व्यधित यो विबुधव्रतते -
र्गुरुतिलकस्य तस्य रुचिरां रचयामि नुतिम्॥ 4 ॥

क्व भुवनसर्वलङ्घिमहिमा निगमान्तगुरुः
क्व पुनरहं मितंपचकथापथजाङ्घिकधीः।
अपि तु सरस्वती मम ननूषति धूतभया
तदपि तदीयदिव्यकरुणापरिणाहबलात्॥ 5 ॥

मृदितसितोर्ध्वपुण्ड्रमुपवीतशिखारुचिरं
हृदयतटोपलक्ष्यतुलसी नळिनाक्षसरम्।
रथपदकम्बुबिम्बपरिचुम्बिभुजद्वितयं
धृतधवलांशुकं हृदि भजे निगमान्तगुरुम्॥ **6** ॥

विविधकथाविधूतपरिपन्थिघटामकुटी
तटविलुठन्मणीघृणिसमुज्ज्वलपादनखः।
गगनपरीपतत्सुरधुनीमहनीयझरी
प्रतिभटसूक्तिरस्तु शुभदो निगमान्तगुरुः॥ **7** ॥

अधिगतरङ्गपुङ्गवपदत्रचरित्रसुधा -
श्शठरिपुभारतीसहजसौरभसारभृतः।
यतिनृपतिप्रबन्धततिबन्धुरगन्धजुषः
कथकधुरन्धरोक्तिनिकरा मम भान्तु हृदि॥ **8** ॥

क्वचन मरन्दबिन्दुलहरीवहरीतिजुषः
क्वचन सुधाझरीसहचरीकरणप्रवणाः।
क्वचिदुपकल्पयन्त्यमरसिन्धुतरङ्गघटा
घुमुघुमितानुगाः परिणतीर्गुरुसिंहगिरः॥ **9** ॥

विबुधनिषेविता विविध तीर्थगणाध्युषिता
विमलरसोल्बणा विहितविष्णुपदानुगतिः।
प्रकटितहंसमत्स्यकमठाद्यवतारशता
जगति सरस्वती जयति वेङ्कटनाथगुरोः॥ **10** ॥

जलधिसुतापदाङ्गदझलज्झलितानुगता
विधिवनिताशताङ्गहयहेषितगर्वमुषः।
मदनधनुर्गुणक्वणनमन्धरमानभिदो
जगति जयन्त्यमी गुरुपुरन्दरसूक्तिझराः॥ **11** ॥

अपि पुनरल्पजल्पमरविन्दभवस्य शिशो -
    रपि कलभाषितानविगणय्य पतिर्जगताम्।
कलयति यद्वचांसि कलशाब्धिसुतासहित -
    स्तमहमुपासिषीय नियतो निगमान्तगुरुम्॥ 12॥

समुदितसद्गुणां मृदुपदां शुभवृत्तजुषं
    विलसदलङ्कृतिं कृतिमवेक्ष्य फणिप्रवरः।
निगमशिखागुरोर्निजशिरश्चलनच्छलतो
    भ्रमयति मौळिरत्नमयमङ्गळदीपगणम्॥ 13॥

मधुसहयुध्वने नवफलद्रवमानमुषे
    सहजनुषे सुधारसझरीलहरीविततेः।
निगमशिखागुरोर्नियमितान्यवचःस्थितये
    कवनकलाविलासकलनाभ्युदयाय नमः॥ 14॥

दळति च शङ्करस्य गळति द्रुहिणस्य मतं
    स्फुटति तथा तथागतकथा शतधा वितथा।
भवति भिदेलिमा सपदि काणभुजी फणिति -
    र्जगति विजृम्भिते कथकसिंहमहानिनदे॥ 15॥

पटुतरतर्ककर्कशनखाङ्कुरनिर्दलित -
    द्विषदिभमौळिमण्डलविनिर्गलितैर्मणिभिः।
दिशि दिशि यद्यशोभिरतनूभिरशोभि जगत्
    कथमुपयाति नैष कवितार्किकसिंहपदम्॥ 16॥

जनिजनितोपतापहरणं शरणं भजता -
    मतिमतिकर्मनर्मसदनं सदनन्तगुणम्।
मधुमधुरोक्तिमुल्लसदयं सदयं हृदय
    श्रय तनयं विरक्तिकमनं तमनन्तगुरोः॥ 17॥

भवनभवनं वाचां प्राचां फणिद्रुहिणाङ्घ्रिदृ -
क्कपिलकणभुक्तन्त्रस्वातन्त्र्यकेळिकलास्पदम्।
कमलविभवास्थानं गन्धर्वकन्धरमन्दुरा
फणिगिरिपतेर्घण्टांशो नस्स पातु कृपाम्बुधिः ॥ **18** ॥

नौमि श्रीमन्तमन्तर्मुखमुखरहयग्रीवहेषाविशेष -
प्रक्षुभ्यद्वैरिविद्वत् प्रणमित मकुटीराजिनीराजिताङ्घ्रिम्।
प्रातस्त्याम्भोजपाळीगळितमधुझरीमाधुरीधुर्यवाणी
श्रेणीभव्यप्रचारं फणिधरणिधराधीशघण्ठावतारम् ॥ **19** ॥

निगमाचलोन्नतगतिर्निर्धूतहिरण्यनिजनखरवृत्तिः।
प्रह्लादसरसहृदयः पायात्कोऽप्यागमान्तगुरुसिंहः ॥ **20** ॥

कवितार्किककण्ठीरवचरणाब्जं बिभृत मौळिभागेषु।
विलसतु वस्सार्वज्ञ्यं विबुधजनास्सर्वमङ्गलोल्लसितम् ॥ **21** ॥

इति बुक्कपट्टणकुलाम्बुधीन्दुना तनयेन तातगुरुवेङ्कटाम्बयोः।
पदवाक्यमानपदवीपटीयसा कृतिरण्णयार्यविदुषा विनिर्मिता ॥ **22** ॥

॥ इति आचार्यविंशति समाप्ता ॥